শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীনরসিংহপুরাণে

# ॥ শ্রী নৃসিংহাৱতারম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী নৃসিংহাৱতারম্ ॥

মার্কণ্ডেয উৱাচ

অথাগতং তে প্রহ্লাদং দৃষ্টৱা দৈত্যাঃ সুৱিস্মিতাঃ।
শশংসুর্দৈত্যপতযে যৈঃ ক্ষিপ্তঃ স মহার্ণৱে॥ 1 ॥

স্ৱস্থং তমাগতং শ্রুৎৱা দৈত্যরাড্ৱিস্মযাকুলঃ।
আহূযতাং চ ইত্যাহ ক্রোধান্মৃত্যুৱশে স্থিতঃ॥ 2 ॥

তথাসুরৈর্দুরানীতঃ সমাসীনং স দিৱ্যদৃক্।
আসন্নমৃত্যুং দৈত্যেন্দ্রং দদর্শাতূর্জিতশ্রিযম্॥ 3 ॥

নীলাংশুমিশ্রমাণিক্যদ্যুতিচ্ছন্নৱিভূষণম্।
সধূমাগ্নিমিৱ ৱ্যাপ্তমুচ্চাসনচিতিস্থিতম্॥ 4 ॥

দংষ্ট্রোৎকটৈর্ঘোরতরৈর্ঘনচ্ছৱিভিরুদ্ভটৈঃ।
কুমার্গদর্শিভির্দৈত্যৈর্যমদৈত্তরিৱাৱৃতম্॥ 5 ॥

দূরাৎ প্রণম্য পিতরং প্রাঞ্জলিস্তু ৱ্যৱস্থিতঃ।
অথাহাকারণক্রোধঃ স খলো ভর্ত্সযন্ সুতম্॥ 6 ॥

ভগৱৎপ্রিযমত্যুচ্চৈর্মৃত্যুমেৱাশ্রযন্নিৱ।
মূঢ রে শৃণু মদ্বাক্যমেতদেৱান্তিমং ধ্রুৱম্॥ 7 ॥

ইতো ন ৎৱাং প্রৱক্ষ্যামি শ্রুৎৱা কুরু যথেপ্সিতম্।
উক্ত্বেতি দ্রুতমাকৃষ্য চন্দ্রহাসাসিমদ্ভুতম্॥ 8 ॥

সম্ভ্রমাদ্বীক্ষিতঃ সর্ৱৈশ্চালযন্নাহ তং পুনঃ.।
ক্ক চাস্তি মূঢ তে ৱিষ্ণুঃ স ৎৱামদ্য প্ররক্ষতু॥ **9**॥

ৎৱযোক্তং স হি সর্ৱত্র কস্মাৎস্তম্ভে ন দৃশ্যতে।
যদি পশ্যামি তং ৱিষ্ণুমধুনা স্তম্ভমধ্যগম্॥ **10**॥

তর্হি ৎৱাং ন ৱধিষ্যামি ভৱিষ্যসি দ্বিধান্যথা।
প্রহ্লাদোঽপি তথা দৃষ্টৱা দধ্যৌ তং পরমেশ্ৱরম্॥ **11**॥

পুরোক্তং তদ্বচঃ স্মৃৎৱা প্রণনাম কৃতাঞ্জলিঃ।
তাৱৎপ্রস্ফুটিতস্তম্ভো ৱীক্ষিতো দৈত্যসূনুনা॥ **12**॥

আদর্শরূপৌ দৈত্যস্য খড্গতো যঃ প্রতিষ্ঠিতঃ।
তন্মধ্যে দৃশ্যতে রূপং বহুযোজনমাযতম্॥ **13**॥

অতিরৌদ্রং মহাকাযং দানৱানাং ভযঙ্করম্।
মহানেত্রং মহাৱক্ত্রং মহাদংষ্ট্রং মহাভুজম্॥ **14**॥

মহানখং মহাপাদং কালাগ্নিসদৃশাননম্।
কর্ণান্তকৃতৱিস্তারৱদনং চাতিভীষণম্॥ **15**॥

কৃৎৱেত্থং নারসিংহং তু যযৌ ৱিষ্ণুস্ত্রিৱিক্রমঃ।
নরসিংহঃ স্তম্ভমধ্যান্ নির্গত্য প্রণনাদ চ॥ **16**॥

নিনাদশ্রৱণাদ্দৈত্যা নরসিংহমৱেষ্টযন্।
তান্ হৎৱা সকলাংস্তত্র স্বপৌরুষপরাক্রমাৎ॥ **17**॥

বভঞ্জ চ সভাং দিৱ্যাং হিরণ্যকশিপোর্নৃপ।
ৱারযামাসুরভ্যেত্য নরসিংহং মহাভটাঃ॥ **18**॥

তে তু রাজন্ ক্ষণাদেৱ নরসিংহেন ৱৈ হতাঃ।
ততঃ শস্ত্রাণি ৱর্ষন্তি নরসিংহে প্রতাপিনি॥ **19**॥

স তু ক্ষণেন ভগৱান্ হৎৱা তদ্বলমোজসা।
ননাদ চ মহানাদং দিশঃ শব্দেন পূরযন্॥ **20** ॥

তান্মৃতানপি ৱিজ্ঞায পুনরন্যান্মহাসুরঃ।
অষ্টাশীতিসহস্রাণি হেতিহস্তান্ সমাদিশৎ॥ **21** ॥

তেঽপ্যাগত্য চ তং দেৱং রুরুধুঃ সর্ৱতোদিশম্।
হৎৱা তানখিলান্ যুদ্ধে যুধ্যমানো ননাদ সঃ॥ **22** ॥

পুনঃ সভাং বভঞ্জাসৌ হিরণ্যকশিপোঃ শুভাম্।
তান্ হতানপি ৱিজ্ঞায ক্রোধসংরক্তলোচনঃ॥ **23** ॥

ততো হিরণ্যকশিপুর্নিশ্চক্রাম মহাবলঃ।
উৱাচ চ মহীপাল দানৱান্ বলদর্পিতান্॥ **24** ॥

হন্যতাং হন্যতামেষ গৃহ্যতাং গৃহ্যতামযম্।
ইত্যেৱং ৱদতস্তস্য প্রমুখে তু মহাসুরান্॥ **25** ॥

যুধ্যমানান্ রণে হৎৱা নরসিংহো ননাদ চ।
ততোঽতিদুদ্রুৱুর্দৈত্যা হতশেষা দিশো দশ॥ **26** ॥

তাৱদ্ধতা যুধ্যমানা দৈত্যাঃ কোটিসহস্রশঃ।
নরসিংহেন যাৱচ্চ নভোভাগং গতো রৱিঃ॥ **27** ॥

শস্ত্রাস্ত্রৱর্ষচতুরং হিরণ্যকশিপুং জৱাৎ।
প্রগৃহ্য তু বলাদ্রাজন্ নরসিংহো মহাবলঃ॥ **28** ॥

সংধ্যাকালে গৃহদ্বারি স্থিৎৱোরৌ স্থাপ্য তং রিপুম্।
ৱজ্রতুল্যমহোরস্কং হিরণ্যকশিপুং রুষা।
নখৈঃ কিসলযমিৱ দারযত্যাহ সোঽসুরঃ॥ **29** ॥

যত্রাখণ্ডলদন্তিদন্তমুসলান্যাখণ্ডিতান্যাহৱে
ধারা যত্র পিনাকপাণিপরশোরাকুণ্ঠতামাগমৎ।
তন্মে তাৱদুরো নৃসিংহকরজৈর্ৱ্যাদীর্যতে সাম্প্রতং
দৈৱে দুর্জনতাং গতে তৃণমপি প্রাযোঽপ্যৱজ্ঞাযতে॥ **30** ॥

এৱং ৱদতি দৈত্যেন্দ্রে দদার নরকেসরী।
হৃদযং দৈত্যরাজস্য পদ্মপত্রমিৱ দ্বিপঃ॥ **31** ॥

শকলে দ্বে তিরোভূতে নখরন্ধ্রে মহাত্মনঃ।
ততঃ ক্ব যাতো দুষ্টোঽসাৱিতি দেৱোঽতিৱিস্মিতঃ॥ **32** ॥

নিরীক্ষ্য সর্ৱতো রাজন্ ৱৃথৈতৎকর্ম মেঽভৱৎ।
ইতি সংচিন্ত্য রাজেন্দ্র নরসিংহো মহাবলঃ॥ **33** ॥

ৱ্যধূনযৎকরাৱুচ্চৈস্ততস্তে শকলে নৃপ।
নখরন্ধ্রান্নিপতিতে ভূমৌ রেণুসমে হরেঃ॥ **34** ॥

দৃষ্টৱা ৱ্যতীতসংরোষো জহাস পরমেশ্ৱরঃ।
পুষ্পৱর্ষং চ ৱর্ষন্তো নরসিংহস্য মূর্ধনি॥ **35** ॥

দেৱাঃ সব্রহ্মকাঃ সর্ৱে আগতাঃ প্রীতিসংযুতাঃ।
আগত্য পূজযামাসুর্নরসিংহং পরং প্রভুম্॥ **36** ॥

ব্রহ্মা চ দৈত্যরাজানং প্রহ্লাদমভিষেচযৎ।
ধর্মে রতিঃ সমস্তানাং জনানামভৱত্তদা॥ **37** ॥

ইন্দ্রোঽপি সর্ৱদেৱৈস্তু হরিণা স্থাপিতো দিৱি।
নরসিংহোঽপি ভগৱান্ সর্ৱলোকহিতায ৱৈ॥ **38** ॥

শ্রীশৈলশিখরং প্রাপ্য ৱিশ্রুতঃ সুরপূজিতঃ।
স্থিতো ভক্তহিতার্থায অভক্তানাং ক্ষযায চ॥ **39** ॥

ইত্যেতন্নরসিংহস্য মাহাত্ম্যং যঃ পঠেন্নরঃ।
শৃণোতি ৱা নৃপশ্রেষ্ঠ মুচ্যতে সর্ৱপাতকৈঃ॥ **40** ॥

নরো ৱা যদি ৱা নারী শৃণোত্যাখ্যানমুত্তমম্।
ৱৈধৱ্যাদ্দুঃখশোকাচ্চ দুষ্টসঙ্গাৎপ্রমুচ্যতে॥ **41** ॥

দুশ্শীলোঽপি দুরাচারো দুষ্প্রজো দোষকর্মকৃৎ।
অধর্মিষ্ঠোঽনভোগী চ শৃণ্ৱন্ শুদ্ধো ভৱেন্নরঃ॥ **42** ॥

হরিঃ সুরেশো নরলোকপূজিতো
  হিতায লোকস্য চরাচরস্য।
কৃৎৱা ৱিরূপং চ পুরাঽঽত্মমাযযা
  হিরণ্যকং দুঃখকরং নখৈশ্ছিনৎ॥ **43** ॥

॥ ইতি শ্রী নৃসিংহাৱতারং সমাপ্তম্॥